# .. dattAparAdhakShamApanastotram ..

## ॥ दत्तापराधक्षमापनस्तोत्रम् ॥

दत्तात्रेयं त्वां नमामि प्रसीद त्वं सर्वात्मा सर्वकर्ता न वेद ।
कोऽप्यन्तं ते सर्वदेवाधिदेव ज्ञाताऽज्ञातान्मेऽपराधान् क्षमस्व ॥ १॥
त्वदुद्भवत्वात्वदधीनधीत्वात्तवमेव मे वन्द्य उपास्य आत्मन् ।
अथापि मौढ्यात् स्मरणं न ते मे कृतं क्षमस्व प्रियकृन्महात्मन् ॥ २॥
भोगापवर्गप्रदमार्तबंधुं कारूण्यसिन्धुं परिहाय बन्धुम् ।
हिताय चाऽन्यं परिमार्गयन्ति हा मादृशो नष्टदृशो विमूढाः ॥ ३॥
न मत्समो यद्यपि पापकर्ता न त्वत्समोऽथापि हि पापहर्ता ।
न मत्समोऽन्यो दयनीय आर्य न त्वत्समः क्वापि दयालुवर्यः ॥ ४॥
अनाथनाथोऽसि सुदीनबन्धो श्रीशाऽनुकम्पामृतपूर्णसिन्धो ।
त्वत्पादभक्तिं तव दासदास्यं त्वदीयमंत्रार्थदृढैकनिष्ठाम् ॥ ५॥
गुरूस्मृतिं निर्मलबुद्धिमाधिव्याधिक्षयं मे विजय च देहि ।
इष्टार्थसिद्धिं वरलोकवश्यं धनान्नवृद्धिं वरगोसमृद्धिम् ॥ ६॥
पुत्रादिलब्धिं म उदारतां च देहीश मे चास्त्वभय हि सर्वतः ।
ब्रह्मा-ऽग्नि-भूम्यो नम ओषधीभ्यो वाचे नमो वाक्पतये च विष्णवे ॥ ७॥
शान्ताऽस्तु भूर्नः शिवमन्तरिक्ष द्यौश्चाऽभयं नोऽस्तु दिश शिवाश्च ।
आपश्च विद्युत्परिपान्तु देवाः श सर्वतो मेऽभयमस्तु शान्तिः ॥ ८॥

॥इति श्रीवासुदेवानन्दसरस्वतीविरचितं
दत्तापराधक्षमापनस्तोत्रं संपूर्णम् ॥

Proofread by Arvind Kolhatkar akolhatkar at rogers.com

Please send corrections to sanskrit@cheerful.com
Last updated January 19, 2005